# svarama njarI text with trans explaining Vedic accents

# સ્વરમઞ્જરી

## Document Information

Text title : svaramaJNjarI

File name : svaramanj.itx

Category : misc, sAhitya, svara, veda

Location : doc_z_misc_general

Transliterated by : Avinash Sathaye sohum at ms.uky.edu

Proofread by : Avinash Sathaye sohum at ms.uky.edu

Description-comments : text + trans. on Vedic accents, grammar rules related to accents (by Tryambak B. Abhyankar)

Latest update : November 1, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 17, 2025

*sanskritdocuments.org*

# સ્વરમઞ્જરી

સ્વરમઞ્જરી અર્થાત્ અષ્ટવિકૃત્યુપેતા
॥ સંહિતા-પદપાઠવિમર્શસહિતા વૈદિકસ્વરપદ્ધતિઃ ॥
(લેખકઃ - વે. શા. સં. ગીર્વાણભૂષણ ત્ર્યંબક બલવંત અભ્યંકર, બી. એ. [ સંસ્કૃત ઑ। ] પુણે। )
॥ પ્રથમગુચ્છઃ - સ્વરપ્રક્રિયાત્મકઃ ॥
મઙ્ગલમ્ (Invocation:)
નાનાનામધરં લોકે લોકાનામભયંકરમ્ ।
સદાશિવસ્વરૂપં તં ત્ર્યંબકં પ્રણમામ્યહમ્ ॥ ૧॥
Translation :
I bow before the three-eyed God Shiva with auspicious features who has many different names and
protects the people of the worlds.
સ્વરમહત્ત્વમ્ (Importance of the accents)

શ્રીર્વૈ સ્વરશ્ચ વેદાનામર્થબોધઃ સુખં સ્વરાત્ ।
શુદ્ધપાઠઃ સ્વરાદેવ સ્વરજ્ઞો લભતે પરમ્ ॥ ૨॥

Translation:
Accents are the precious features of the Vedas, it is easy to know the meaning through the accents, also the expert in the accents acquires the proper intonation of the Vedas through their use.
ગ્રંથપ્રયોજનમ્ (Purpose of this book.)

સ્વરજ્ઞાનપ્રવેશાય દ્વિજાનાં વેદપાઠિનામ્ ।
ત્ર્યંબકીયામિમાં વક્ષ્યે વૈદિકસ્વરપદ્ધતિમ્ ॥ ૩॥

ભગવાન્ પાણિનિર્વેત્તિ સ્વરશાસ્ત્રમહાર્ણવમ્ ।
ઉડુપં મત્કૃતિર્ભૂયાત્ તરિતું તં સુદુસ્તરમ્ ॥ ૪॥

સુસૂક્ષ્મવિષયસ્યાસ્ય શાસ્ત્રીયપ્રતિપાદને ।
ન તથાસ્તિ કૃતો યત્નો યથા બાલાવબોધને ॥ ૫॥

Translation:
I will describe my (ત્ર્યંબકીય) system of accents to introduce the Vedic students
to the science of the accents. Lord Panini knows the whole ocean of this science, let my work serve as a boat to cross this difficult ocean! (To date) no effort like this has been made to make the technical discussion of this subtle subject accessible to a layman.
સ્વરિતવાઙ્મયમ્ (Accented literature)

સંહિતાઃ સર્વવેદાનાં બ્રાહ્મણં તૈત્તિરીયકમ્ ।
સારણ્યકં શતપથં વાઙ્મયં સ્વરિતં સ્મૃતમ્ ॥ ૬॥

ભિન્નાનિ સ્વરચિહ્નાનિ યદિ શાખાસુ કાસુચિત્ ।
સમાનૈવાસ્તિ સર્વેષાં વેદાનાં સ્વરપદ્ધતિઃ ॥ ૭॥

Translation:
The list of books which use the accent-system consists of all Vedas, TaittirIya BrAhmaNa and
AraNyaka and Shatapatha. In different branches, the notational system may be varied, but the
accent system is uniformly the same!
સ્વરભેદાઃ (Different Accents)

ઉદાત્તશ્ચાનુદાત્તશ્ચ વસ્તુતશ્ચ દ્વિધાઃ સ્વરાઃ ।
સ્વરિતઃ પ્રચયશ્ચાસ્તેઽનુદાત્તઃ સ્થાનભેદતઃ ॥ ૮॥

ઉદાત્તમુચ્ચ ઇત્યાહુર્નીચ ઇત્યનુદાત્તકમ્ ।
સમાહારસ્તયોર્જાત્યસ્વરિતશ્ચ નિગદ્યતે ॥ ૯॥

Translation:
Their are mainly two accents UdAtta ( Acute ) and AnudAtta (Grave). Others called Svarita (Circumflex) and Pracahya are in reality AnudAtta in special positions.
UdAtta is described as “high” and AnudAtta as “low”. Their combination
(in one syllable) is described as JAtyasvarita (Independent Svarita ).
સ્વરક્રમઃ (List of Accents)

અનુદાત્ત-ઉદાત્તશ્ચ-સ્વરિતઃ પ્રચયઃ ક્રમાત્ ।
ઉદાત્તાદિતરે સર્વે નિહતા ઇતિ સંસ્મૃતાઃ ॥ ૧૦॥

Translation:
AnudAtta, UdAtta, Svarita and Prachaya is the list of accents. All except UdAtta are known as Nihata (lowered at the end).

ઉદાત્તમહત્ત્વમ્ (Importance of UdAtta)

ઉદાત્તો ધ્રુવ એતેષામુદાત્તાલંબિનોઽપરે ।
ઉદાત્ત એક એવાસ્તિ નિશ્ચિતશ્ચ પદે પદે ॥ ૧૧॥

Translation:
UdAtta is central to this system, all others depend on it! Each Pada contains at most one UdAtta.
Note: Pada પદ denotes an individual word unit that the saMhitA સંહિતા
- or the continuous text) is usually broken into. Several padas join to make a pAda પાદ.
Usually two pAdas make up a RichA ઋચા, the basic unit of the sUkta સૂક્ત.
The version where the padas are listed separately is known as padapAtha પદપાઠ and the accent rules for it are described below.

વેદભેદાદુદાત્તઃ (variation of the UdAtta symbols)

ઉદ્રેખિત ઉદાત્તોઽસ્તિ મૈત્રાયાં કાઠકે તથા ।
ઉદેકાઙ્કાન્વિતઃ સામ્નિ રેખિતોઽધઃ શતે પથે ॥ ૧૨॥

શાખાયાં તૈત્તિરીયાયામૃગ્વેદાથર્વવેદયોઃ ।
તથા વાજસનેય્યાં ચ ચિહ્નહીન ઉદાત્તકઃ ॥ ૧૩॥

Translation:
The UdAtta is marked with a superscript bar in MaitrAyaNI and KAThaka. It has a superscript 1 in the SAmaveda and in Shatapatha it is underlined. In TaittirIya, Rigveda and Atharvaveda as well as VAjasaneya, it is unmarked.

સ્વરચિહ્નાનિ (The accent symbols)

ઉદાત્તોઽચિહ્નિતો નિત્યં પ્રચયશ્ચાપ્યચિહ્નિતઃ ।
ઉદ્રેખિતશ્ચ સ્વરિતો રેખિતોઽધોઽનુદાત્તકઃ ॥ ૧૪॥

કોશાદેવાવગન્તવ્યં કિમુદાત્તં પદેઽક્ષરમ્ ।
ઉદાત્તે ચૈકદા જ્ઞાતે જ્ઞાયન્તે ચ પદસ્વરાઃ ॥ ૧૫॥

Translation:
(Except as noted above,) the UdAtta is unmarked and so is the Prachaya. The svarita has a superscripted bar and AnudAtta is underlined.
Note: This describes the main Rigveda system
and others when they correspond.
In general, the notations need to be checked for individual
books. Unless otherwise stated, the Rigveda system is described here.
To know which syllable
is UdAtta, you need to consult appropriate references. Once an UdAtta is recognized, the rest of accents
in a Pada are known.
Note: A syllable means a full letter consisting of a consonant
combination with the trailing vowel or what constitutes a full letter અક્ષર.
અનુદાત્તઃ (AnudAtta)

ઉદાત્તપૂર્વતઃ સર્વેઽનુદાત્તા રેખિતા અધઃ । - વૈશ્વાનરઃ ।

Translation:
All AnudAttas before an UdAtta are underlined.
સ્વરિતઃ (Svarita)

ઉદાત્તોત્તરતશ્ચાદ્યોઽનુદાત્તઃ સ્વરિતસ્વરઃ ॥ ૧૬॥ - પુરોહિતમ્ ।

Translation:
The first AnudAtta after an UdAtta is a Svarita.
પ્રચયઃ (Prachaya)

સ્વરિતોત્તરતઃ સર્વેઽનુદાત્તાઃ પ્રચયાઃ સ્મૃતાઃ । - ઇમં મે ગંગે યમુને ।

Translation:
All AnudAttas (in a string) following a Svarita are known as Prachaya
સન્નતરઃ (Sannatara)

પ્રચયોઽન્યપદોદાત્તપરઃ સન્નતરઃ સ્મૃતઃ ॥ ૧૭॥ - સરસ્વતિ શુતુદ્રિ ।

Translation:
A Prachaya (in one Pada) followed by an UdAtta in the next Pada is known as Sannatara.
ઉદાત્તઃ (Recognition of UdAtta)

પ્રાયઃ સ્વરિતપૂર્વસ્થોઽનુદાત્તોત્તરતોઽપિ વા ।
ઉદાત્તોઽચિહ્નિતો નિત્યં તદ્યુક્ ચાનિહતં પદમ્ ॥ ૧૮॥ - મીઢુષે ।

Translation:
Generally, an unmarked syllable just before a Svarita or just after an AnudAtta is UdAtta.
The pada with an UdAtta is known as Anihata (not fully lowered).
જાત્યઃ (Recognition of the JAtya)

નિર્દિષ્ટાત્ સ્વરિતાદન્યઃ સ્વરિતો જાત્યનામકઃ ।
વિવિધં ચિહ્નિતો વેદે સદૈવોદાત્તસદૃશઃ ॥ ૧૯॥

ઋગ્વેદે તૈત્તિરીયાયાં સ ચાપ્યુદ્રેખિતઃ પુનઃ ।
નીચાત્ પરઃ પદાદૌ વા સ્વરિતો યઃ સ જાત્યકઃ ॥ ૨૦॥ - વીર્યમ્ । સ્વઃ ।

Translation:
There is a Svarita which arises in a different manner
( i.e . without the UdAtta interaction as described above) and its is known as
JAtya (Indepndent). It is marked differently in various Vedas and appears similar
to an UdAtta (in intonation).
In Rigveda and TaittirIya, it is superscripted with a bar.
Any Svarita which appears right after a NIcha (low - or unchanged AnudAtta)
or in the beginning of a Pada (must be) a JAtya Svarita.
સ્વરપરિવર્તનમ્ (Special transformations of accents)

નિત્યં યાત્યનુદાત્તત્વં યદન્યોદાત્તપૂર્વતઃ ।
સ્વરિતઃ પ્રચયશ્ચૈવ યશ્ચ સન્નતરસ્તતઃ ॥ ૨૧॥ - નમો હિરણ્યબાહવે । પતયે નમઃ ।

Translation:
A Prachaya or a Svarita which appears just before an UdAtta becomes an AnudAtta and
hence is a Sannatara.
સ્વરસન્ધયઃ (Vowel joins across Padas)

ઉચ્ચેન પરભૂતેન સન્ધિર્નિત્યમુદાત્તકઃ ।
તથૈવ પૂર્વભૂતેન યદિ જાત્યો ન સંભવેત્ ॥ ૨૨॥ - ત્રીણિ+એકઃ = ત્રીણ્યેકઃ । નાવા+ઇવ=નાવેવ ।

Translation:
If an UdAtta or AnudAtta syllable joines with the following UdAtta (vowel), then the joined syllable becomes UdAtta.
If an UdAtta syllable joins with the following UdAtta or AnudAtta (vowel), then the joined syllable becomes UdAtta, unless it becomes a JAtya Svarita (as described below).
જાત્યોત્પત્તિઃ (Creation of the JAtya)

ઉદાત્તપૂર્વકઃ સન્ધિર્યદ્યુદાત્તાનુદાત્તયોઃ ।
સ ચાભિનિહિત-ક્ષૈપ્ર-પ્રશ્લિષ્ટાત્મક એવ ચેત્ ॥ ૨૩॥

ઉદાત્તસદૃશો જાત્યસ્તદૈવોત્પદ્યતે સદા ।
અત્યુચ્ચં તસ્ય પૂર્વાર્ધં પરાર્ધં પ્રચયાત્મકમ્ ॥ ૨૪॥

Translation:
A join as discussed above becomes a JAtya if the corresponding join is one of the three types known as Abhinihita, Kshaipra, or PrashliShTa described below . the JAtya which is thus created has the first part much higher and the second like a Prachaya and generally sounds UdAtta.
જાત્યભેદઃ (Classes of JAtya)

સ જાત્યસ્વરિતશ્ચાસ્તિ ભેદ્યોઽભેદ્ય ઇતિ દ્વિધા ।
અભેદ્યઃ પદસંભૂતો ભેદ્યશ્ચ દ્વિપદોત્થિતઃ ॥ ૨૫॥ - રાજન્યઃ । સોઽકામયત ।

Translation:
This JAtya is called indivisible, if it arises within a Pada, while it is divisible if it comes due to joining two Padas.
ક્ષૈપ્રઃ (Kshaipra)

ઉદાત્તસ્યાનુદાત્તસ્ય યદા સંધિર્યણાત્મકઃ ।
ક્ષૈપ્રનામા તદા જાત્યસ્વરિતઃ સર્વદા ભવેત્ ॥ ૨૬॥ - ત્રિ+અંબકમ્=ત્ર્યમ્બકમ્ ।

Translation:
If an UdAtta and AnudAtta join creats YaN (the consonants y, v, r, l), then the resulting JAtya is known as Kshaipra.

પ્રશ્લિષ્ટઃ (PrashliShTa)

સ સંધિસ્તુ યદા ભૂયાત્ હ્રસ્વેકારદ્વયોત્થિતઃ ।
પ્રશ્લિષ્ટસંજ્ઞકો જાત્યઃ શાકલ્યમતતો ભવેત્ ॥ ૨૭ ॥ - દિવિ+ઇવ = દિવીવ ।

Translation:
If the join comes from two short i, then according to ShAkalya, it is called PrashliShTa.
અભિનિહિતઃ (Abhinihita)

એ-અ-સ્વરાત્મકઃ સ્યાચ્ચેત્ સંધિઃ સોઽવગ્રહાન્વિતઃ ।
તદાભિનિહિતો નામ જાત્યસ્વરિત ઉચ્યતે ॥ ૨૮ ॥

- યે+અંતરિક્ષે = યેંઽતરિક્ષે । યઃ+અસ્માન્=યોઽસ્માન્ ।

Translation:
If the join is a combination of e and a resulting in an Avagraha, then it is known as Abhinihita.
કમ્પઃ (Kampa)

જાત્યશ્ચ કમ્પતે નિત્યં જાત્યોચ્ચૌ પરતો યદિ ।
જાત્યશ્ચેતદ્ હ્રસ્વવર્ણાન્તસ્તન્મધ્યૈકાઙ્કમાલિખેત્ ॥ ૨૯ ॥ - અપ્સ્વ kપ્ ન્તઃ ।
જાત્યશ્ચેદ્દીર્ઘવર્ણાન્તસ્તન્મધ્યે ત્ર્યઙ્કમાલિખેત્ ।
ઉદધોરેખિતં કાર્યં સદૈતચ્ચાકૃતિદ્વયમ્ ॥ ૩૦ ॥ - ઓક્યેKપ્ સોમમ્ ।
કમ્પો વિલિખ્યતે ચૈવમૃગ્વેદાથર્વવેદયોઃ ।
વિવિધં ચિહ્ન્યતેઽન્યત્ર તત્રતત્રાવલોકયેત્ ॥ ૩૧ ॥

શાખાયાં તૈત્તિરીયાયાં જાત્યો જાત્યાત્પરો યદિ ।
અધોરેખં તયોર્મધ્યે નિત્યમેકાઙ્કમાલિખેત્ ॥ ૩૨ ॥ - વીર્યં ૧ વ્યભજત્ ।

Translation:
Any JAtya followed by another JAtya or UdAtta vibrates or acquires a Kampa.
If the JAtya is a short vowel, then insert a number 1 between them (it and the following JAtya or UdAtta) and in case it is long, insert the number 3. These numbers are to be marked with the superscript bar as well as the underline . In Rigveda and Atharvaveda, Kampa is denoted thus . For variations in other books, look therein . In TaittirIya, an underlined
1 is written between two JAtya Svaritas.

સ્વરિતો દ્વિવિધઃ (Svarita Types)

એવં ચ સ્વરિતશ્ચાસ્તે શુદ્ધો જાત્ય ઇતિ દ્વિધા ।
ઉદાત્તાચ્ચ પરઃ શુદ્ધઃ સ્વરૂપેણાનુદાત્તકઃ ॥ ૩૩॥ - માનોઽવધીઃ ।
સ્વરિતત્વં ચલં તસ્ય પૂર્વોદાત્તવશં યતઃ ।
નીચત્વં ચ પુનર્ગચ્છેત્ પરતશ્ચેદુદાત્તકઃ ॥ ૩૪॥ - માનો ગોષુ ।

Translation:
Svarita is classified as Shuddha (Pure or depenedent) or JAtya (Independent).
The Pure or dependent Svarita is naturally an AnudAtta occuring after an UdAtta.
Its property of being a Svarita is thus unstable since it depends on the prior UdAtta.
Moreover,
it becomes NIcha (AnudAtta) if it is further followed by an UdAtta.
જાત્યસ્વરિતઃ (Independent Svarita)

નીચાત્પરઃ પદાદૌ વા સ્વરૂપેણોભયાત્મકઃ ।
સ્વયં ચ સ્વરિતો જાત્ય ઉચ્ચતુલ્યશ્ચ કંપવાન્ ॥ ૩૫॥ - રાજન્યઃ । ક્વ ।

Translation:
The JAtya Svarita is naturally created (as described) in the beginning of a Pada or after a NIcha (AnudAtta), is similar to an UdAtta in sound and has Kampa (following it).
ઉદાત્તપ્રચયયોર્વિશેષઃ (Distinguishing UdAtta and Prachaya)

ઉદાત્તઃ સ્વરિતાત્પૂર્વઃ પ્રચયઃ સ્વરિતાત્પરઃ ।
પ્રચયો યાતિ નીચત્વં પરતશ્ચેદુદાત્તકઃ ॥ ૩૬॥ - નમસ્તે । ધૃતવ્રતો વરુણઃ ।

Translation:
UdAtta occurs before a Svarita, while Prachaya occurs after it . Prachaya followed by an UdAtta becomes NIcha.
સ્વરોચ્ચારઃ (Pronunciation)

ઉદાત્તશ્ચાનુદાત્તશ્ચ સ્વરિતશ્ચ ત્રયઃ સ્વરાઃ ।
ઉચ્ચૈર્નીચૈસ્તથા તિર્યક્ ત ઉચ્ચન્તેઽક્ષરાશ્રયાઃ ॥ ૩૭॥

સ્વરાનુચ્ચારયેત્ સ્પષ્ટં નાતિદૂરં ચ તાન્ નયેત્ ।
સ્વરોચ્ચારઃ કથં કાર્યઃ શ્રોતવ્યં તદ્ગુરોર્મુખાત્ ॥ ૩૮॥

Translation:

The three accents UdAtta, AnudAtta and Svarita can be (roughly) described as High, Low and
Across (High-low) and are attached to the whole syllables.
The accents should be clearly enunciated and should not be stretched too much (should not be made too high or too low). The actual method must be learned from the Guru directly!

॥ સ્વરમઞ્જર્યાં દ્વિતીયગુચ્છઃ ॥

ક્રિયાપદસ્વરાઃ:-

આદૌ વાક્યસ્ય પાદસ્ય ક્રિયાપદમુદાત્તકમ્ ।
મધ્યે સહેતુકં હન્તચનેદ્ધિકુવિદન્વિતમ્ ॥ ૩૯ ॥

યસ્માદામન્ત્રિતં વાક્યે નાન્તર્ભવિતુમર્હતિ ।
ઉચ્ચં ક્રિયાપદં વાક્યાદિસ્થસંબોધનાત્પરમ્ ॥ ૪૦ ॥ - અગ્ને નય ।
નિરુદાત્તમનાદિસ્થં મુખ્યવાક્યક્રિયાપદમ્ ।
ઉપસર્ગઃ પદં ભિન્નં ચોપસર્ગ ઉદાત્તકઃ ॥ ૪૧ ॥ ત્ર્યંબકં યજામહે । ઇદં વિષ્ણુર્વિચક્રમે ।
ઉદાત્તકં સદૈવાસ્તે ગૌણવાક્યક્રિયાપદમ્ ।
ક્રિયાપદપદાઙ્ગશ્ચેદુપસર્ગોઽનુદાત્તકઃ ॥ ૪૨ ॥ - ય ઈશે અસ્ય । યતો વિષ્ણુર્વિચક્રમે ।
યદિ તૌલનિકોક્તિશ્ચેદાદ્યવાક્યક્રિયાપદમ્ ।
ઉદાત્તકં ભવેદ્યસ્માત્તદ્વાક્યં ગૌણમુચ્યતે ॥ ૪૩ ॥

ઉદા । અજોહ્યેકોજુષમાણોઽતુ શેતે જહાત્યેનાં ભુક્તભોગાભજોઽન્યઃ ॥

તયોરન્યઃ પિપ્પલં સ્વાદ્વત્તિ ॥

યદ્યેકકર્તૃકાઃ સન્તિ વાક્યે ચ બહુલાઃ ક્રિયાઃ ।
વિનાદ્યામુચ્ચકાઃ શેષાસ્તાભ્યો વાક્યં નવં યતઃ ॥ ૪૪ ॥ તરણિરિજ્જયતિ ક્ષેતિ પુષ્યતિ ।

Translation:

સંબોધનસ્વરાઃ:-

સંબોધનમનાદિસ્થં નિહતં ચેદહેતુકમ્ ।
વાક્યારમ્ભે ચ પાદાદૌ ત્વાદ્યવર્ણ ઉદાત્તકમ્ ॥ ૪૫ ॥ - નમસ્તે રુદ્ર । પ્રજાપતે ન ત્વદેતાન્યન્યો ।
વાક્યારમ્ભસ્થિતાનેકસંબુદ્ધ્ય ઉદાત્તકાઃ ।
પ્રાયોઽનુદાત્તકં વિદ્યાત્ સંબોધનવિશેષણમ્ ॥ ૪૬ ॥ - દ્રાપેઅન્ધસસ્પતે દરિદ્રત્ । પૃથિવિ માતઃ ।

Translation:

સમાસસ્વરાઃ:-

પ્રધાનં યત્પદં ચાસ્તે સમાસે તદુદાત્તકમ્ ।

પદદ્વયં પ્રધાનં ચેત્ પદદ્વયમુદાત્તકમ્ ॥ ૪૭॥

ઉદાત્તકં પદં ચાન્ત્યં પ્રાયસ્તત્પુરુષાદિષુ । - ઇન્દ્ર-શત્રુઃ ।
આમ્રેડિતસમાસે ચ પદમાદ્યમુદાત્તકમ્ ॥ ૪૮॥ દ્યવિદ્યવિ ।
બહુવ્રીહિસમાસ્ય પૂર્વં પદમુદાત્તકમ્ ।
પુરુ-દ્વિ-ત્રિ-સુ-નઞ્-તુવ્યન્વિતસ્યાન્ત્યમુદાત્તકમ્ ॥ ૪૯॥ - વજ્રબાહુઃ । ઇન્દ્રશત્રુઃ । ત્રિનાભિ ।

Translation:
dવ્યુ દાત્તકાઃ:-
પ્રાયેણ દેવતાદ્વન્દ્વે પદદ્વયમુદાત્તકમ્ । - દ્યાવાપૃથિવી ।
પરન્તુ ચાવ્યયદ્વન્દ્વે પૂર્વં પદમુદાત્તકમ્ ॥ ૫૦॥ - સાયંપ્રાતઃ ।
યદિ ષષ્ઠીવિભક્ત્યઙ્ગં સમાસપ્રથમં પદમ્ ।
ઉદાત્તકં તદા ભૂયાત્ તત્સમાસપદદ્વયમ્ ॥ ૫૧॥ - બૃહસ્પતિઃ । શુનઃ શેપઃ । બ્રહ્મણસ્પતિઃ ।
તવૈ-પ્રત્યયુક્ષબ્દસ્યાદિશ્ચાન્ત ઉદાત્તકઃ । - એતવૈ ।
નરાશંસો dવ્યુ દાત્તઃ સ્યાત્તદ્વદેવ શચીપતિઃ ॥ ૫૨॥ - શચીપતિઃ ।

Translation:
ઉપસર્ગસ્વરાઃ:-
વિંશતેરુપસર્ગાણામુચ્ચા એકાક્ષરા નવ ।
અન્તોદાતઃ સ્મૃતોઽભીતિ દશાન્યે ચાદ્યુદાત્તકાઃ ॥ ૫૩॥

Translation:
સર્વદાનુદાત્તકાઃ:-
સંબોધનં તથા નિત્યં મુખ્યવાક્યક્રિયાપદમ્ ।
યદા ન વાક્યપાદાદૌ તદા તન્નિરુદાત્તકમ્ ॥ ૫૪॥ - ઇમં મે ગઙ્ગે યમુને । ગણપતિં હવામહે ।
સર્વનામ્નાં ચ રૂપાણિ યાનિ વૈકલ્પિકાનિ તુ ।
ઈમ્-સીમ્-યથા ચ વાક્યાન્તે નિપાતા નિરુદાત્તકાઃ ॥ ૫૪ અ ॥ - યા ત ઇષુઃ । વિશો યથા ।
ઉદાત્તકા નિપાતેષુ નૂનં હ્યેવં કિલાદયઃ ।
નુ-સુ-હીતિ પદેભ્યશ્ચ કમ્ શબ્દો નિહતઃ પરઃ ॥ ૫૫॥

અસ્યેતિ પ્રથમાદેશ ઉદાત્તં સ્મર્યતે પદમ્ ।
અન્વાદેશેઽનુદાત્તં તદ્યદિ ચેદ્વાક્યમધ્યગમ્ ॥ ૫૬॥ - ય ઈશે અસ્ય દ્વિપદઃ । અથો યે અસ્ય સત્વાનઃ ।

Translation:

॥ સ્વરમઞ્જર્યાં તૃતીયો ગુચ્છઃ । ઇતરવેદસ્વરાઃ ॥

મૈત્રાયણીકાઠકસ્વરાઃ:-

મૈત્રાયણીકાઠકયોરુદાત્તસ્તૂર્ધ્વરેખિતઃ ।
ઉદાત્તે ચૈકદા જ્ઞાતે જ્ઞાયન્ત ઇતરસ્વરાઃ ॥ ૫૭॥

તે દેવા રાત્રિમસૃજન્ત । (તે દેવા રાત્રિમસૃજન્ત ।)

અધોઽર્ધવક્રિતો જાત્યોઽનુદાત્તઃ પરતો યદિ ।
અચિહ્નિતસ્ત્ર્યઙ્કુપૂર્વઃ પરતશ્ચેદુદાત્તકઃ ॥ ૫૮॥

અધોબિન્દુયુતશ્ચાસ્તે કાઠકે સ્વરિતઃ પુનઃ ।
અધઃકીલાઙ્કિતો જાત્યઃ પરતશ્ચેદુદાત્તકઃ ॥ ૫૯॥

Translation:

શતપથસ્વરાઃ:-

નૂનં શતપથે ભૂયાત્ કેવલોદાત્તદર્શનમ્ ।
ઉદાત્તઃ સ્યાદધોરેખાઙ્કિતઃ શતપથે સદા ॥ ૬૦॥ - અથ તૃણૈઃ પરિસ્તૃણાતિ ।
ક્રમેણ ચેદ્ બહૂદાત્તાસ્તેષામન્ત્યસ્તુ ચિહ્ન્યતે ।
ઉદાત્તચિહ્નમાપ્નોતિ વર્ણો જાત્યપરોઽપિ ચ ॥ ૬૧॥ - સ તપોઽતપ્યત । મનુષ્યઃ ।

Translation:

સામવેદસ્વરાઃ:-

સામવેદે સ્વરાઃ સર્વે વર્ણોપર્યઙ્કદર્શિતાઃ ।
એકાઙ્કુચિહ્નિતો વર્ણઃ સામવેદ ઉદાત્તકઃ ॥ ૬૨॥

ત્ર્યઙ્કાઙ્કિતોઽનુદાત્તશ્ચ સ્વરિતો dવ્ય ઙ્કુચિહ્નિતઃ ।
dવ્ય ઙ્કાઙ્કિત ઉદાત્તોઽપિ પરતઃ સ્વરિતો ન ચેત્ ॥ ૬૩॥

dવ્યુ દાત્તપૂર્વઃ સ્વરિતો રકારdવ્ય ઙ્કુચિહ્નિતઃ ।
એકાઙ્કુયુક્તયોરાદ્યશ્ચિહ્નહીનો દ્વિતીયકઃ ॥ ૬૪॥

યદિ દ્વાભ્યામુદાત્તાભ્યામનુદાત્તઃ પરસ્તદા ।
ઉકારdવ્ય ઙ્કુયુક્ ચાદ્યો દ્વિતીયઃ સ્યાદચિહ્નિતઃ ॥ ૬૫॥

જાત્યસ્વરિત એવાપિ રકારdવ્ય ઙ્કુચિહ્નિતઃ ।
જાત્યાત્પૂર્વોઽનુદાત્તસ્તુ કકારસ્ત્ર્યઙ્કુચિહ્નિતઃ ॥ ૬૬॥

ત્ર્યઙ્કોત્તરો dવ્ય ઙ્કુયુક્તો જાત્ય ઉચ્ચપરો યદિ ।
પ્રચયોઽચિહ્નિતશ્ચાસ્તે સામવેદેઽપિ સર્વદા ॥ ૬૭॥

Translation:

॥ ચતુર્થો ગુચ્છઃ । સંહિતાપદપાઠવિમર્શઃ ॥

પદપાઠઃ (On PadapATha)

પાદો માનં સંહિતાયાં પદં માનં પદેષુ ચ ।
એકત્ર્યઙ્કાત્મકઃ કમ્પઃ પદપાઠે ન ચાસ્ત્યતઃ ॥ ૬૮॥

Translation:

The unit in the SaMhitA (continuous text) is PAda, while it is Pada in the PadapATha.
The Kampa with the numbers 1,3 does not exist in the PadapATha, because of this.

સંહિતાપાઠાત્ પદપાઠઃ (Conversion to PadapATha)

અધોરેખાઙ્કિતાન્ કુર્યાત્ સ્વરિતાન્ પ્રચયાનપિ ।
તતઃ પદાનિ વિગૃહ્ય સર્વાણિ ચ પૃથક્ લિખેત્ ॥ ૬૯॥

ઉદાત્તં ચ ધ્રુવં કૃત્વા લિખેત્ પ્રતિપદં સ્વરાન્ ।
યદિ કશ્ચિત્તત્ર જાત્યસ્તં યથૈવ તથા લિખેત્ ॥ ૭૦॥

છાન્દસં યદશુદ્ધં સ્યાત્ શુદ્ધં કૃત્વા તુ તલ્લિખેત્ ।
વૈશિષ્ટ્યાનિ ચ સર્વાણિ પદપાઠસ્ય દર્શયેત્ ॥ ૭૧॥ - (સં।) શ્રુધી (પ।) શ્રુધિ

Translation:

To convert to PadapATha from SaMhitA, put underlines under the Prachaya and the Svarita.
Then break up the Padas and write them separately . Each Pada should be writeen and marked
using the central UdAtta . If some JAtya occurs, it should be marked as such . If anything is
metrically incorrect, it should be restored properly and written down . The various
special features and terms of the PadapATha should be then added.

પદપાઠાત્ સંહિતાપાઠઃ (Conversion to SaMhitA)

વૈશિષ્ટ્યાનિ ચ સર્વાણિ પદપાઠસ્ય લોપયેત્ ।
અધોરેખાઙ્કિતાન્ કુર્યાત્ સ્વરિતાન્ પ્રચયાંસ્તથા ॥ ૭૨॥

કુર્યાચ્ચ પદસંયોગં સન્ધિશાસ્ત્રાનુસારતઃ ।
ઉદાત્તકાન્ ધ્રુવં કૃત્વા રચયેત્ સ્વરપદ્ધતિમ્ ॥ ૭૩॥

એકત્ર્યઙ્કાત્મકં કમ્પં યોગ્યસ્થાને સમાલિખેત્ ।

છન્દોયોગ્યં હ્રસ્વદીર્ઘાદિકં સર્વં પ્રકલ્પયેત્ ॥ ૭૪॥

Translation:
The special features and terms of the PadapATha should be dropped . The Svarita and Prachaya
should be underlined and then the Padas should be joined according to the Sandhi Rules . By
paying attention to the central UdAttas, the whole marking system of the accents should be created . The Kampa marks should be introduced and the short or long vowels adjusted to the
meters.

॥ પઞ્ચમો ગુચ્છઃ । પદપાઠીયવૈશિષ્ટ્યાનિ ॥

સમાસવિચારઃ:-
શબ્દં સામાસિકં વિદ્યાન્નિત્યમેકપદાત્મકમ્ ।
અવગ્રહાન્વિતં કુર્યાત્ સમાસસ્ય ચ વિગ્રહમ્ ॥ ૭૫॥ - બજડબાહુઃ ।
નૈવ દ્વન્દ્વસમાસસ્ય વિગ્રહઃ ક્રિયતે કદા ।
ઇવેન ચ સમાસો હિ સ શબ્દશ્ચ વિગૃહ્યતે ॥ ૭૬॥ - મિત્રાવરુણૌ । વત્સંડઇવ ।
નિષેધકં ચાક્ષરં અ ન કદાપિ વિયુજ્યતે ।
પ્રેગૃહ્યાન્તસમાસસ્ય વિગ્રહેશ્ચેત્યનન્તરમ્ ॥ ૭૭॥ - અહસ્તઃ । સુદાનૂ ઇતિ સુડદાનૂ ।

Translation:
પ્રગૃહ્યવિચારઃ:-
ઈ-ઊ-એ ચાસ્તિ પ્રગૃહ્યો નિત્યં દ્વિવચનસ્ય ચ ।
એકારાન્તં દ્વિવચનં મધ્યમોત્તમયોસ્તથા ॥ ૭૮॥ - હરી ઇતિ । મમાતે ઇતિ ।
અસ્મે-યુષ્મે-અમી-ત્વે ચ પ્રગૃહ્યાઃ સર્વનામસુ ।
પ્રગૃહ્યાન્તાન્ સદા શબ્દાન્ ઇતિ શબ્દેન દર્શયેત્ ॥ ૭૯॥ - અસ્મે ઇતિ । ત્વે ઇતિ ।
ઓકારાન્તા ચ સમ્બુદ્ધિરોકારાન્તો નિપાતકઃ ।
રેફાત્મકવિસર્ગશ્ચેદિતિશબ્દેન યુજ્યતે ॥ ૮૦॥ - કારો ઇતિ । ઉષો ઇતિ । પુનરિતિ । અકરિત્યક ।
સાનુસ્વારશ્ચ દીર્ઘશ્ચ ઇતિયુક્તો નિપાત ઉ ।
પદપાઠીય ઇતિયુક્ શબ્દ એકપદાત્મકઃ ॥ ૮૧॥ - ઊં ઇતિ । રોદસી ઇતિ ।

Translation:
પ્રત્યયવિચારઃ:-

પ્રત્યયાસ્ત્રા-તર-તમા મત્-વત્-ભ્યાં-ભ્યઃ-સુ-ભિસ્તથા ।
વિગૃહ્યન્તે યદિ સ્યાચ્ચેદ્ મૂલરૂપં યથાતથમ્ ॥ ૮૨॥ - પુરુષઽત્રા । ગોઽમતીઃ । રશ્મિઽભિઃ
અવગ્રહઃ સદામધ્યે ધાતુરૂપો-પસર્ગયોઃ ।
નહિ-નક્યાદયઃ શબ્દા નિત્યમેકપદાત્મકઃ ॥ ૮૩॥ - વિઽસ્થિતઃ । નહિ । નકિઃ ।

Translation:
તૈત્તિરીયવિશેષાઃ:-
વિશેષાઃ પદપાઠીયાસ્તૈત્તિરીયા અધસ્તનાઃ ।
મુખ્યક્રિયોપસર્ગાણાં નેદિષ્ટ ઇતિશબ્દભાગ્ ॥ ૮૪॥ - અભિ । સમિતિ । નમંતુ ।
યાનિ વિગ્રહયોગ્યાનિ સંહિતાયાં પદાનિ ચ ।
અવગ્રહાન્વિતસ્તેષાં વિગ્રહશ્ચેત્યનન્તરમ્ ॥ ૮૫॥ - મહેન્દ્ર ઇતિ મહાઽઇન્દ્રઃ । વર્મભિરિતિ વર્મઽભિઃ ।
અવગ્રહાત્ પરં શબ્દં ભિન્નં મત્વા સ્વરં લિખેત્ ।
ઇવ-શબ્દઃ પદં ભિન્નં દ્વન્દ્વસ્યાપિ ચ વિગ્રહઃ ॥ ૮૬॥ - અનુમત્યા ઇત્યનુઽમત્યૈ ।

Translation:

॥ ષષ્ઠો ગુચ્છઃ । વેદાર્થવિચારઃ ॥

:-

પદાનિ પૂર્વં જાનીયાત્ પદસ્વરમનન્તરમ્ ।
ઉપસર્ગાન્ ક્રિયાશબ્દૈઃ સંયોજ્યાર્થં પ્રદર્શયેત્ ॥ ૮૭॥

અર્થ-સ્થાનવશાન્નિત્યં શબ્દાનામુચ્ચનીચતા ।
ઉદાત્તાનુગુણશ્ચાર્થો દર્શનીય ઇતિ સ્થિતિઃ ॥ ૮૮॥

સ્થાનાર્થયોરભેદે તુ શબ્દસ્ય સદૃશઃ સ્વરઃ ।
યદા ન તં સ્વરં પશ્યેદન્યથાર્થં તદા નયેત્ ॥ ૮૯॥

એવં પદે સમાસે વા યત્રોદાત્તો વ્યવસ્થિતઃ ।
તાત્પર્યં તત્ર શબ્દસ્ય સ્થાપયેદિતિ નિર્ણયઃ ॥ ૯૦॥

અન્ધકારે ચ દીપેન ગચ્છન્ન સ્સ્ખલતિ ક્વચિત્ ।
સ્વરપ્રકાશિતશ્ચૈવં વેદાર્થે ન પ્રમાદ્યતિ ॥ ૯૧॥

Translation:

॥ ઉપસંહારઃ ॥

:-

અભ્યંકરકુલોત્પન્નસ્ત્ર્યંબકો બાલદેહજઃ ।

સમીક્ષ્ય સંહિતાઃ સમ્યક્ કૃતવાન્ સ્વરમઞ્જરીમ્ ॥ ૯૨॥

વેદાર્થસુખબોધાય શાસ્ત્રીયપઠણાય ચ ।
તસ્યા અધ્યનનં કાર્યં સાર્થમેવ ચ વૈદિકૈઃ ॥ ૯૩॥

ભૂ-શાસ્ત્ર-વસુ-ભૂશાકે (૧૮૬૧) શ્રાવણે કૃષ્ણવૈષ્ણવે ।
મત્પૂજ્યગુરુપાદાભ્યાં મઞ્જરીયં સમર્પિતા ॥ ૯૪॥

મન્ત્રશ્ચેત્ સ્વરતો હીનો વજ્રં ભૂત્વા હિનસ્તિ સઃ ।
સ એવ કામધુગ્ ભૂયાત્ પઠિતશ્ચેદ્યથાસ્વરમ્ ॥ ૯૫॥

Translation:
॥ ઇતિ શ્રી । બી । એ । ઇત્યુપપદસમલંકૃત-ગીર્વાણભૂષણ-અભ્યંકરોપાહ્વ
ત્ર્યંબકશાસ્ત્રિપ્રણીતસ્વરમઞ્જરી સમાપ્તા ॥

Encoded and proofread by Avinash Sathaye sohum at ms.uky.edu
Some portion is not translated yet, but the
the specific portion does not seem so important for the rules
of accents . It is more general and is about the grammar rules related
to accents, is usually useless for a specific document. –Avinash.

---

*svarama njarI text with trans explaining Vedic accents*

pdf was typeset on March 17, 2025

Please send corrections to *sanskrit@cheerful.com*